ल्युट्। १नेत्रे अमरः। तस्य बुद्धिवृत्तेः स्वसंयोगिविषयप्रापकत्वात् तथात्वम्। "सेविष्यन्ते नयनसुभगं खे भवन्तं बलाकाः" मेघ०। "अथ नयनसमुत्थं ज्योतिरत्रेरिव द्यौः" रघुः अस्य स्वाङ्गत्वेऽपि बह्वच्कत्वात् उपसर्जनत्वे स्त्रियां न ङीप्। "दयिता दयिताननाम्बुजं दरमीलन्नयना निरीक्षते" रसगङ्गा० भावे ल्युट्। २प्रापणे ३यापने च "नयनं पारिजातस्य द्वारकां मम रोचते" हरिवं०१२९ "कालस्य नयने युक्ताः सोमपत्न्यः शुचिव्रताः" भा०आ०६६अ० "कालस्य नयने युक्ता यमस्य पुरुषाश्च ये" भा०स० ८अ०।

**नयनाभिघात** पु० ६त०। सुश्रुतोक्ते नयनाभिहननरूपे रोगभेदे यथोक्तम् "अथातो नयनाभिघातप्रतिषेधं व्याख्यास्यामः। अभ्याहते तु नयने बहुधा नराणां संरम्भरागतुमुलास्तु रुजास्तु धीमान्। नस्यप्रलेपपरिषेचनतर्पणाद्यमुक्तं पुनः क्षतजपित्तजशूलपथ्यम्। दृष्टिप्रसादजननं विधिमाशु कुर्यात्स्निग्धैर्हिमैश्च मधुरैश्च तथा प्रयोगैः। स्वेदाग्निधूमभयशोकरुजाभिघातैरभ्याहतावपि तथैव भिषक् चिकित्सेत्। सद्योहते नयन एष विधिस्तदूर्द्ध्वं स्यन्दैरितो भवति दोषमवेक्ष्य कार्यः। अभ्याहतं नयनमीषदथास्य वाष्पसंस्वेदितं भवति तन्न रुजं क्षणेन। साध्यं क्षतं पटलमेकमुभे तु कृच्छ्रे त्रीणि क्षतानि पटलानि विवर्जयेत्तु। स्यात्पिच्चिटञ्च नयनं स्रुति चावसन्नं स्रस्तं च्युतञ्च हतदृक्च भवेत्तु याप्यम्। विस्तीर्णदृष्टितनुरागमसत्प्रदर्शि साध्यं यथास्थितमनाविलदर्शनञ्च। प्राणोपरोधवमनक्षवकण्ठरोधैरुच्चैस्ययमाशु नयनं यदतिप्रविष्टम्। नेत्रे विलम्बिनि विधिर्विहितः पुरस्तादुच्छिंहनं शिरसि वार्य्यवसेचनञ्च। षट्सप्ततिर्नयनजा य इमे प्रदिष्टा रोगा भवन्त्यमहतां महताञ्च तेभ्यः। स्तन्यप्रकोपककफमारुतपित्तरक्तैर्बालाक्षिवर्त्म भव एव कुकूणकोऽन्यः। स्ट्नाति नेत्रमतिकण्डुमथाक्षिकूटनासाललाटमपि तेन शिशुः स नित्यम्। सूर्य्यप्रभां न सहते स्रवति प्रवृद्धं तस्याहरेद्रुधिरमाशु विनिर्लिखेच्च। क्षौद्रायुतैश्च कटुभिः प्रतिसारयेत्तु बालः शिशोरभिहितञ्च विधिं विदध्यात्"।

**नयनाभिराम** पु० नयनमभिरमयति अभि+रम–णिच्–अण् नयनयोरभिरामो यस्मात् वा। १चन्द्रे "आयुः क्षयञ्च कुरुते नयनाभिरामः" वैवाहिकलग्नफलोक्तौ ज्योतिर्वसिष्ठः। २नेत्रानुरागकारके प्रियमात्रे त्रि०।

**नयनी** स्त्री नी–करणे ल्युट् ङीप्। नेत्रकनिकायां शब्दचि०

**नयनोत्सव** पु० नयनयोरुत्सवो यस्मात्। १दीपे शब्दर०। तस्यालोकेन हि नेत्रस्य दर्शनयोग्यत्वम् "गृह्णाति चक्षुःसम्बन्धादालोकोद्भूतरूपयोः" भाषा० आलोकसम्बन्धेन नयनस्य विषयग्राहित्वोक्तेः। २नेत्रोत्सवकारिमात्रे त्रि०।

**नयनोपान्त** पु० ६त०। अपाङ्गे राजनि०।

**नयनौषध** न० ६त०। पुष्पकासीसे हेमच०। [त्रिका०।

**नयपीठी** स्त्री नयस्य पीठीव। (छक्) द्यूताङ्गे अष्टकोष्ठे

**नयवर्त्म** ६त०। नीतेर्मार्गे षाड्गुण्यप्रयोगे षट् गुणाश्च "सन्धिविग्रहयानानि संस्थाप्याथ दमस्तथा। द्वैधीभावश्च विज्ञेयाः षड्गुणा नीतिवेदिनाम्" नीतिसा०।

**नयविशारद** त्रि० ७त०। नीतिशास्त्रानुसारेण षाड्गुण्यप्रयोगाभिज्ञे "षाड्गुण्यविधितत्त्वज्ञो देशभाषाविशारदः। सान्धिविग्रहिकः कार्य्यो राज्ञा नयविशारदः" मात्स्ये ८९अ०।

**नर** पुंस्त्री० नॄ–नये अच्। १मनुष्ये जातित्वात् स्त्रियां नारीत्येव "पुत्रे यशसि तोये च नराणां पुण्यलक्षणम्"। "नराणाञ्च नराधिपः" गीता "नरतीति नरः प्रोक्तः परमात्मा सनातनः" व्यासोक्तेः २परमात्मनि "नराज्जातानि तत्त्वानि नाराणीति विदुर्बुधाः" वेदमन्त्रम् "आपो नारा इति प्रोक्ता आपो वै नरसूनवः" मनुः। "जह्नुर्नारायणो नरः" विष्णुसं०। ३पुंसि राजनि०। ४देवभेदे "ततस्तदमृतं देवो विष्णुरादाय वीर्य्यवान्। जहार दानवेन्द्रेभ्यो नरेण सहितः प्रभुः। एवं सुतुमुले युद्धे वर्त्तमाने महाभये। नरनारायणौ देवौ समाजग्मतुराहवम्" भा० आ०१९अ० स्वारोहिहारके ५शङ्कौ निघण्टुः ६नरदेवस्यावतारे अर्जुने मेदि०।

"नरनारायणौ यौ तौ पुराणावृषिसत्तमौ। ताविमावनुजानीहि हृषीकेशधनञ्जयौ। विख्यातौ त्रिषु लोकेषु नरनारायणावृषी। कार्य्यार्थमवतीर्णौ तौ पृथ्वीं पुण्यप्रतिश्रयाम्। यन्न शक्यं सुरैर्द्रष्टुमृषिभिर्वा महात्मभिः। तदाश्रमपदं पुण्यं बदरीनाम विश्रुतम्। स निवासोऽभवद्विप्र! विष्णोर्जिष्णोस्तथैव च। यतः प्रववृते गङ्गा सिद्धचारणसेविता। तौ मन्नियोगाद्ब्रह्मर्षे! क्षितौ जातौ महाद्युती। भूमेर्भारावतरणं महावीर्य्यौ करिष्यतः" भा०व० ४७अ० "तेषां मनश्च तेजश्चाप्याददाना विवौजसा। पूर्वदेवौ व्यतिक्रान्तौ नरनारायणावृषी।